Postal Regd.No. GAMC- 1553/2022-2024
ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १७ अङ्क : १९७
ऑक्टोबर - २०२२

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### आत्मदर्शनम्

वयं सदैव चिन्तयामः यत् कानिचित् कार्याणि क्लिष्टानि, कठिनानि, दुर्बोधानि वा वर्तन्ते। यथा हि ध्यानं, योगः दर्शनम् इत्यादीनि। वस्तुतः कोऽपि विषयः यावत् न ज्ञायते तावत् एव दुर्बोधः इव लक्ष्यते। परन्तु सः एव विषयः सम्यक् ज्ञातः चेत् सुबोधः भवति। व्याकरणस्य अध्ययने मया अनुभूतं यत्, यत् सूत्रं यावत् न ज्ञायते तावत् एव तत् दुर्बोधं प्रतीयते।

तथैव तत्त्वज्ञानं तत्त्वदर्शनं वा कठिनं नास्ति। (तस्य भाष्यं कठिनं भवितुम् अर्हति।) एतस्य विचारस्य बीजं मया महाभारते दृष्टम्। महाभारतकारः (शान्तिपर्वणि) लिखति यत् मनुष्यः वैदिकं ज्ञानं यत्नेन प्राप्तुं शक्नोति। अर्थात् वेदानाम् अवबोधः श्रमसाध्यः वर्तते। परन्तु ब्रह्मज्ञानं श्रमसाध्यं नास्ति। तस्य कारणं वर्तते – वेदाः (अपि) आदि-अन्तवन्तः सन्ति। किन्तु ब्रह्म अनन्तम् अस्ति। यत् शाश्वतं वर्तते, तस्य अवगमने दृष्टिः आवश्यकी, न तु परिश्रमः।

अतः एव अद्यतनाः आत्मज्ञानिनः (!) कठिनाः स्युः, किन्तु आत्मज्ञानं सरलमेव। अत्र आवश्यकम् अस्ति सम्यक् अवलोकनम्। अवलोकनं चक्षुर्विषयः खलु। संसारे सर्वविधः प्रपञ्चः नेत्रयोः कारणेन वर्तते। चक्षुर्हीनः मनष्यः न सूर्यं द्रष्टुं शक्नोति, न च चन्द्रम्। मनुष्यः विचारेण तर्केण वा प्रकाशं ज्ञातुं न शक्नोति। परन्तु प्रकाशस्य दर्शनाय दृष्टिः आवश्यकी। सा कुतः प्राप्तव्या ?

वयम् आत्मानं द्रष्टुं न शक्नुमः, तस्य कारणम् अस्ति। वयं सदा पुरतः स्थितस्य अपरस्य मनुष्यस्य विषये ज्ञातुं प्रयत्नं कुर्मः। तथापि तं मनुष्यं वयं तत्त्वतः ज्ञातुं न शक्नुमः। कोऽपि मनुष्यः यावत् स्वं न जानाति – स्वस्मिन् दृष्टिं न पातयति, तावत् अपरं जनम् अपि ज्ञातुं न शक्नोति। आदौ स्वं ज्ञातुं प्रयत्नः कर्तव्यः। स्वस्मिन् एव गाढम् अवतीर्णः मनुष्यः अपरं जनम् अनायासं ज्ञातुं शक्नोति। केवलं क्रमस्य परिवर्तनेन सर्वाणि द्वाराणि उद्घाटयितुं शक्यन्ते।

पथिकः स्वयं यत्र चलति, तं मार्गं न जानाति। परन्तु सः अपरैः कस्मिन् मार्गे चलनीयम् इति निरन्तरं चिन्तयति। यः स्वस्य मार्गं न जानाति, सः मार्गदर्शकः कथं भवेत् ? कश्चित् नाट्यकारः एवं सङ्क्षेपेण वक्तुं शक्नोति –

**प्रसार्य योगजालानि संघृष्य चन्दनानि वा ।**
**यो न वेत्ति प्रतिच्छायां बद्धा तस्य तरिस्तटे ॥**

## निष्कपटस्य वचनम्

शतानन्दः विरूपनामकस्य राज्यस्य महाराजः। तस्य कोषाधिकारी जयराजः। अथ कदाचित् जयराजः रोगपीडितः सन् शय्याम् आश्रितवान्। अतः तं द्रष्टुं महाराजः तदीयं गृहं गतः। तदा जयराजेन उक्तम्– ''महाराज ! मम अन्तिमकालः सन्निहितः। अतः मम स्थाने योग्यायाः व्यक्तेः नियोजनम् उचितमिति प्रतिभाति'' इति।

''भवतः वंशः एव देशसेवायै समर्पितः इत्यंशम् अहं जानामि एव। अतः भवत्स्थाने भवतः पुत्रस्यैव नियोजनं कर्तुम् इच्छामि अहम्'' इति राजा अवदत्।

एतत् श्रुत्वा जयराजः उक्तवान् – ''प्रभो, मम पुत्रः निष्कपटः विश्वासयोग्यश्च इत्यत्र सन्देहः एव नास्ति। तथापि तस्मिन् कोशाधिकारिणः दायित्वं वोढुं सामर्थ्यं नास्ति। अहं समर्थं, सत्यवन्तं, विश्वासपात्रं निष्कपटं कञ्चन युवकं जानामि। सः गोपालपुरवासी। तस्य नाम 'गोपालः' इति। बहुभ्यः वर्षेभ्यः भवते तं परिचाययितुम् अहम् उत्सुकः आसम्। सः मम दूरबन्धुश्च ! शुभे दिने तस्मै वार्तां सम्प्रेषयिष्यामि'' इति।

शतानन्दः तस्य वचनं श्रुत्वा किमपि अवदन् ततः निर्गतः। ततः अचिरात् एव जयराजस्य मृत्युः सञ्जातः। तेन महद् दुःखम् अनुभूतं राज्ञा। ततः जयराजस्य गृहसदस्यान् गोपालनामकस्य युवकस्य विषये पृष्टवान् सः। किन्तु ते एतं विषयं न जानन्ति स्म एव। अतः राजा गोपालपुरं प्रति स्वसेवकान् प्रेषितवान्। सेवकाः तत्र गत्वा परिशील्य प्रत्यागताः। ते राजानम् उक्तवन्तः – ''तत्र गोपालनामकाः त्रयः युवकाः सन्ति। त्रयः अपि समर्थाः योग्याश्च। ते त्रयः अपि केनचित् प्रकारेण जयराजस्य बन्धवः अपि'' इति।

इदानीं राजा चिन्तामग्नः सञ्जातः – 'एषु त्रिषु जयराजेन उक्तः गोपालः कः ? तस्य अन्वेषणं कथम्' इति। अतः सः मन्त्रिणा सह अस्मिन् विषये समालोचितवान्। मन्त्री बहुधा विचिन्त्य अन्ते उक्तवान् – ''वेषान्तरं धृत्वा गोपालपुरं गत्वा एतं विषयं ज्ञातुं यतिष्यावहे'' इति।

ततः राजा मन्त्री च वेषान्तरं धृत्वा गोपालपुरं गतवन्तौ, तत्रत्यान् गोपालत्रयस्य विषये ज्ञातवन्तौ च। तदा सर्वैः त्रयाणाम् अपि गोपालानां विषये तमेव अभिप्रायं प्रकटितवन्तः यश्च पूर्वं राज्ञा ज्ञातः एव आसीत्। एतत् दृष्ट्वा मन्त्री राजानम् अवदत् – ''प्रभो ! एतादृशेषु विषयेषु एतद्ग्रामवासिभ्यः अपि अन्यग्रामवासिनः एव अधिकं साहाय्यं कुर्युः। अतः आवाम् अन्यत्र गत्वा विचारयाव'' इति।

एवं गमनसमये धर्मवीरः नाम कश्चन वृद्धः ताभ्यां दृष्टः। सः दारिद्र्येण सह मौढ्यस्य अदक्षतायाश्च प्रतिरूपम् इव आसीत्। सः स्वोदरपूरणाय अन्यान् अवलम्बते स्म। अतः सः तस्मिन् ग्रामे दातारः के के इति सम्यगेव जानाति स्म।

मन्त्री धर्मवीरं ग्रामे स्थितानां पञ्चषाणां विषये कांश्चन प्रश्नान् पृष्टवान्। ततः तम् उक्तवान् – ''भवतः शुभदिनानि आगतानि सन्ति। अस्मिन् ग्रामे गोपालनामकाः त्रयः युवकाः सन्ति इति ज्ञातम्। भवान् एकैकम् अपि गोपालनामकं दृष्ट्वा भविष्यवाणीं वदेत् यत् राज्ञः आस्थाने भवता उद्योगः लप्स्यते इति। तत् श्रुत्वा तैः यत्

प्रतिफलरूपेण दीयते तत् स्वीकृत्य सुखेन जीवनं यापयतु'' इति।

एतत् श्रुत्वा धर्मवीरः उक्तवान् – ''अहं भवन्तौ न जानामि ! भवतः कथनस्य अनुसारं भविष्यवाणी यदि मया उच्येत तर्हि काले तैः राजास्थाने उद्योगः न प्राप्यते चेत् अहं मिथ्यावचनः खलु भविष्यामि ? तदा ते मारयेयुः माम्। अतः एवं कर्तुम् अहं बिभेमि'' इति।

''तैः निश्चयेन राजास्थाने उद्योगः प्राप्स्यते एव। चिन्ता मास्तु। भयस्य किमपि कारणं नास्ति। यतः आवामपि भवता सह एव आगमिष्यावः । भविष्यवाणीम् उक्त्वा प्रतिफलं तान् याचतु । किन्तु प्रतिफलं तु तेभ्यः उद्योगप्राप्त्यनन्तरमेव स्वीकरणीयम्। अग्रे भवतः जीवनं सुखमयं भविष्यति'' इति उक्तवान् सचिवः।

धर्मवीरेण एतत् अङ्गीकृतम् । ततः त्रयः अपि गोपालनामकस्य गृहं गतवन्तः । मन्त्री तं गोपालनामकम् अवदत् – ''आवां समीपग्रामस्थौ। एषः धर्मवीरः आवयोः विषये यां भविष्यवाणीम् उक्तवान् सा सत्यवाणी अभूत्। अपि च अनेन अस्माकं विषये इतोऽपि अनेके विषया: उक्ताः। आवाभ्यां ज्ञातव्यं यत् अनेन उक्तं सर्वमपि सत्यम् उत असत्यम् इति। एषः धर्मवीरः भवद्ग्रामीणः। अतः अस्य परिचयः भवतः स्यात् एव। एतस्य विषये कः अभिप्रायः भवतः ?'' इति। तदा सः गोपालः – ''अये धर्मवीर ! कदा भवान् ज्यौतिषिकः संवृत्तः ? आत्मानं ज्यौतिषिकं कथयन् किं भवान् अन्यग्रामस्थान् वञ्चयन् अस्ति ?'' इति पृष्टवान्। ''कतिपयेभ्यः दिनेभ्यः पूर्वं मयि एतत् ज्ञानं जागरितम् अस्ति। पुरतः विद्यमानानां मुखदर्शनेनैव तेषां भूतभविष्यवर्तमानकालीनां स्थितिं ज्ञातुं समर्थः जातः अस्मि। अतः अनया विधया जीवनयापनं चिन्तयन् अस्मि। एतत् कथं वञ्चनं भवेत् ?'' इति।

''तर्हि मम विषये भवतः ज्योतिश्शास्त्रं किं वदति ? भवान् मां सम्यक् जानाति एव। मम भविष्यं कथमस्ति इति वदतु, पश्यामि'' इति हास्यमिश्रितेन स्वरेण उक्तवान् गोपालः।

''शृणोतु। दिनद्वयाभ्यन्तरे भवता राजास्थाने उद्योगः प्राप्स्यते। प्रतिफलरूपेण मह्यं किं ददाति भवान् ?'' इति धर्मवीरः पृष्टवान्।

''राजधानीं प्रति गमनमेव मम ललाटे न लिखितम्। एवं स्थिते मया कथं राजास्थाने उद्योगः प्राप्येत ? तथापि भवतः वचनं यदि सत्यं भवेत् तर्हि अहं भवते दश सुवर्णनाणकानि दास्यामि'' इति गोपालः हसन् एव उक्तवान्।

एवमेव अन्येन गोपालेन सह अपि सम्भाषणम् अभवत्। सः अपि राजास्थाने उद्योगः प्राप्स्यते चेत् प्रति – फलरूपेण अट्टत्रयात्मकं भवनं भवते दास्यामि इति वचनं दत्तवान्।

किन्तु तृतीयः गोपालः तु – ''मया राजास्थाने उद्योगः प्राप्स्यते चेत् मम प्रथममासस्य वेतने अर्धभागं भवते दास्यामि'' इति वचनं दत्तवान्।

तस्य एतत् वचनं श्रुत्वा अनुक्षणं धर्मवीरः मूर्च्छितः अभवत्। राजा, मन्त्री, गोपालः च धर्मवीरस्य मुखे जलं सिञ्चन्तः, उत्थितं तं पृष्टवन्तः – ''किमर्थम् एवं जातम् ?'' इति। धर्मवीरः उपविशन् राजानं मन्त्रिणं च उक्तवान् – ''अहं एतान् त्रीन् अपि सम्यक् एव जानामि। अहम् एतान् बहुवारं दानं याचितवान् अस्मि। अतः मम एतेषां परिचयः

( अनुसन्धानम् ५ पृष्ठे... )

## ग्रन्थपरिचयः ( कर्णभारम् )

व्योम शाहः

यस्य नाट्यसाहित्यसिन्धौ अवगाहनेन बहवोऽपि कवयः विद्वांसः च धन्यमन्याः भवन्ति तस्यैव महाकवेः भासस्य नाटकचक्राद् अस्मिन् अवसरे 'कर्णभारम्' इति नामधेयस्य नाट्यस्य रसास्वदनं कुर्मः।

**कृतिप्रकारपरिचयः** – दूतघटोत्कचम् इव कर्णभारम् उत्सृष्टिकाङ्कः इति साहित्यप्रकारे एव भवति। अस्मिन् रूपकभेदे एकः अङ्कः, अनतिकोविदाः नायकाः करुणश्च रसः भवति। प्रसङ्गः पुराणेतिहासाऽन्तर्भूतः इतिवृत्तरूपेण गृहीत्वा स्वकीयया कल्पनया प्रपञ्चयितुं शक्यते। यद्यपि अस्य रूपकभेदस्य लक्षणद्वयं – बहूनि स्त्रीपात्राणि तेषां च विलापः, तथा वाक्–सङ्ग्रामः अस्मिन् न सम्पूर्णतया अन्तर्भवति तथापि विदुषां मते करुणरसस्य व्याप्तेः कारणाद् अयम् उत्सृष्टिकाङ्कः एव।

**आधारसामग्री** :– अस्य नाट्यस्य मुख्यः आधारः महाभारतस्य वनपर्वान्तर्गतः कवचकुण्डलदानप्रसङ्गः तथा च शान्तिपर्वान्तर्गतः अस्त्रविद्याध्ययनप्रसङ्गः।

**कथासारः** – अस्मिन् नाट्ये सर्वविघ्नोपशमनार्थं मङ्गलश्लोके सूत्रधारः नृसिंहावतारधृतस्य श्रीविष्णोः स्तुतिं करोति। मङ्गलानन्तरं सः नाट्यस्थितिम् उपस्थापयति – यत् कश्चित् भृत्यः दुर्योधनस्य आज्ञया कर्णाय निवेदयति। एवम् उक्त्वा सः निष्क्रामति।

नाट्यारम्भे भटः प्रविश्य अङ्गेश्वराय कर्णाय 'युद्धकालः उपस्थितः' इति विज्ञापयितुम् इतस्ततः कर्णम् अन्विष्यन् भ्रमति। कर्णस्य आविर्भावं नाटयन् सः श्लोकेन कर्णस्य तेजसः विषयम् अधिकृत्य स्तौति। ततः कर्णशल्यौ प्रविशतः। अर्जुनेन सह योद्धुमुत्सुकः कर्णः शल्यराजं तत्रैव गन्तुम् आदिशति। शल्यः तथैव करोति। ततः कर्णः विश्लेषम् अनुभवति। व्याकुलः सः चिन्तयति यत् – कुन्त्यां समुत्पन्नत्वाद् इमे पाण्डवाः मम अनुजाः एव। अस्यां परिस्थितौ किं करणीयम् इति विचार्य मम मनः विश्लेषं प्रकटयति।

सः अग्रे कथयति यत् – एषः कीदृशः दिवसः समागतः शिक्षितम् अस्त्रम् अपि अद्य निरर्थकम् एव यतः अद्य युद्धे मातुः वचनाद् वारितः अभवम्। एवम् उक्त्वा सः स्वकीयस्य अस्त्रस्य वृत्तान्तं शल्यराजं श्रावयति। शल्यराजोऽपि कौतूहलेन वृत्तान्तं शृणोति – "पुरा अहं जामदग्न्यस्य सकाशम् अगच्छम्। सः मह्यम्। आशीर्वचनं दत्त्वा पृष्टवान् यत् कः त्वम्? किमर्थम् अत्र आगतः?" अहं सर्वेषां शस्त्राणां शिक्षां ग्रहीतुम् इच्छामि इति उक्तवान्। सः प्रत्युदितवान् यद् 'अहं ब्राह्मणेषु एव शिक्षणं करोमि, न क्षत्रियेषु' इति। अहं क्षत्रियः नास्मि इति उक्त्वा परशुरामात् अहम् अस्त्रविद्याम् अधीतवान्। ततः कृमिप्रसङ्गः अभवत्। गुरोः निद्रा छिन्ना न भवेद् इति विचिन्त्य अहम् उरुद्वये कृतां वेदनां सहितवान्। तत्र रोषाकूलेन गुरुणा अहं शापितः यत् "तव अस्त्राणि काले विफलानि भविष्यन्ति।"

कर्णः शास्त्रेषु शक्तिहीनताम् अनुभवति। अपि च अश्वाः गजाः च रणाद् निवर्तनम् एव निवेदयन्तः प्रतिभान्ति। शल्यराजः वृतान्तं श्रुत्वा कष्टम् अनुभवति। कर्णः निषादात् निवर्त्यर्थं शल्यराजं वदति।

अत्र प्रसिद्धा उक्तिः कर्णेन गीता। तद्यथा – '**हतोऽपि लभते स्वर्गं जित्वा तु लभते यशः।**
**उभे बहुमते लोके, नास्ति निष्फलता रणे॥**'

**(क्रमशः...)**

# मासवार्ता

**आरब्धः "Diploma in Sanskrit Teaching" अभ्यासक्रमः**

संस्कृतमाध्यमेन संस्कृतं पाठयितुं समर्थानां शिक्षकाणां प्रशिक्षणाय एकलव्य-संस्कृत-एकेडेमी प्रतिवर्षं "Diploma in Sanskrit Teaching" इति अभ्यासक्रमं सञ्चालयति । एतस्मिन् वर्षेऽपि सप्टेम्बरमासस्य ८ दिनाङ्के अभ्यासक्रमोऽयं आरब्धः वर्तते । २२ छात्राः अभ्यासक्रमेऽस्मिन् प्रवेशं स्वीकृतवन्तः । अभ्यासक्रमोऽयं श्रीसोमनाथ-संस्कृत-विश्वविद्यालयेन सह संलग्नः वर्तते । जुलाईमासपर्यन्तं छात्राः संस्कृतशिक्षकप्रशिक्षणं ग्रहीष्यन्ति।

**आरब्धः श्रीमद्भागवतपुराणवर्गः**



शास्त्राध्ययनं कर्तुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य-संस्कृत-एकेडेमी अनेकान् अभ्यासक्रमान् सञ्चालयति । एतस्मिन् एव उपक्रमे संस्थानेन सप्टेम्बरमासस्य १ दिनाङ्कात् श्रीमद्भागवतपुराणवर्गस्य आरम्भः कृतः वर्तते । अभ्यासक्रमेऽस्मिन् श्रीमद्भागवतपुराणस्य दशमस्कन्धस्य नियतांशस्य श्लोकानाम् अभ्यासः भविष्यति । अभ्यासक्रमेऽस्मिन् छात्राः श्लोकोच्चारणं पदपरिचयं भावानुवादं च पठिष्यन्ति । श्रीमती ओजसी सुखटणकरः छात्रेभ्यः मार्गदर्शनं प्रदास्यति। अभ्यासक्रमोऽयं नवम्बरमासस्य ८ दिनाङ्कं यावत् प्रचलिष्यति।

**निष्कपटस्य वचनम्**

जातः अस्ति । पूर्वं यौ गोपालौ दृष्टौ तौ उभौ अपि सज्जनौ एव । किन्तु न वचनपरिपालकौ तौ । चिन्तनं विना ताभ्यां वचनं दीयते । यः मह्यं दश सुवर्णनाणकानि ददामि इति उक्तवान् सः एकं सुवर्णनाणकं दद्यात् कदाचित् । यः अट्टत्रयात्मकस्य भवनस्य दानं प्रतिज्ञातवान् सः एकाम् इष्टिकां दत्त्वा – 'एतदेव भवनमिति भावयतु' इति वदेत्। किन्तु एषः तृतीयः गोपालः न तथा। एषः वचनपरिपालकः। वचनं दत्तं चेत् तस्य पालनं प्राणेभ्योऽपि महत् इति भावयति। राजास्थाने उद्योगप्राप्त्यनन्तरं प्राप्तस्य प्रथममासस्य वेतनस्य अर्धभागः तेन मह्यं दत्तश्चेत् तद् धनं मम जीवननिर्वहणाय पर्याप्तं भवेत्। एतत् सर्वं विचिन्त्य मम मनः सन्तोषातिरेकेण विसंज्ञम् अभवत्" इति।

तदा मन्त्री गोपालं धर्मवीरं च निजविषयं निवेद्य राजानम् उक्तवान् – "प्रभो ! अहं यदि एवं न कुर्यां तर्हि धर्मवीरः सत्यांशं मां न अवदिष्यत्। अतः मया एतत् नाटकम् आरचितम्। इदानीं तु आवयोः अन्वेषणं फलप्रदं जातम्। एषः तृतीयः गोपालः एव अस्माकं कृते योग्यः" इति।

राजा तृतीयं गोपालम् एव कोषाधिकारिपदे नियुक्तवान् । धर्मवीरः अपि यथाशक्ति साहाय्यं कृतवान् । अन्ययोः गोपालयोः कृते अपि राजास्थाने उद्योगः दत्तः।

## कृपया हसन्तु

शिक्षकः - (नमनं प्रति) कस्य गृहे शान्तिः भवति ?

नमनः - यस्मिन् गृहे पतिः पत्नी च उभौ अपि दूरभाषयोः प्रयोगं कुरुतः तत्र शान्तिः भवति ।

★ ★ ★ ★ ★

यमराजः - (रमणं प्रति) चल, अहं त्वां स्वीकर्तुम् आगतोऽस्मि ।

रमणः - भोः केवलं निमेषद्वयं ददातु ।

यमराजः - निमेषद्वये किं कर्तुं शक्ष्यसि त्वम् ?

रमणः - 'फेसबुक-उपरि' 'स्टेटस' स्थापयितुम् इच्छामि, 'श्वर्गलोकं प्रति प्रयाणम्' इति ।

★ ★ ★ ★ ★

शिक्षकः - (रमणम् उद्दिश्य) किमर्थम् अद्य विलम्बेन विद्यालयम् आगतवान् ?

रमणः - मम पितरौ कलहं कुर्वाणौ आस्ताम् ।

शिक्षकः - तयोः कलहः प्रचलन् स्यात्, तत्र तव किं प्रयोजनम् ?

रमणः - महोदय ! मम एका पादरक्षा मातुः समीपे एका च पितुः समीपे आसीत् ।

★ ★ ★ ★ ★

मतदाता - (निर्वाचनाधिकारिणम् उद्दिश्य) भवान् अङ्गुल्यां यां मशीं स्थापयति सा कदा निर्गच्छेत् ?

अधिकारी - प्रायः मासद्वयं तु एषा मशी भवतः अङ्गुल्याः उपरि स्थास्यति एव ।

मतदाता - (स्वस्य मस्तकम् अग्रे कृत्वा) कृपया एतां मशीं मम मस्तकस्य उपरि स्थापयतु । अहं मम मस्तकस्य उपरि केशवर्णं लेपयामि सः तु सप्ताहाभ्यन्तरे एव निर्गच्छति ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**चक्षुःपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।**
**सत्यपूतां वदेद्वाणीं मनःपूतं समाचरेत् ॥**

**तात्पर्यम्** – जनः मार्गं सम्यक् दृष्ट्वा पादं स्थापयेत्, वस्त्रेण जलस्य संशोधनं कृत्वा पिबेत्, सत्ययुक्तां वाणीं वदेत्, तथा मनसा सम्यक् विचार्य व्यवहारं कुर्यात्।

**चलत्येकेन पादेन तिष्ठत्येकेन पण्डितः ।**
**नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥**

**तात्पर्यम्** – बुद्धिमान् एकेन पादेन चलनावसरे एव अपरमपि संस्थाप्य तिष्ठति । पूर्वतनस्य अपेक्षया उत्तमं स्थानम् अप्राप्य बुद्धिमान् पूर्वतनं न परित्यजेत्।

**चलन्ति गिरयः कामं युगान्तपवनाहताः ।**
**कृच्छ्रेऽपि न चलत्येवं धीराणां निश्चलं मनः ॥**

**तात्पर्यम्** – पर्वताः युगपर्यन्तं वायुना ताडिते सति किञ्चिद्वा चलन्ति । परन्तु धीराणां मनः क्लेशकाले अपि निश्चलं भवति। चञ्चलं न भवति।



चिन्तनीया हि विपदाम् आदावेव प्रतिक्रिया।

## ज्ञानसरित्

श्यामः पटेलः

**विना सूर्यप्रकाशं जीवन्ती श्रीवल्ली** – वयं सर्वे जानीमः यत् वनस्पतयः सूर्यप्रकाशस्य साहाय्येन एव स्वभोजनं निर्माय जीवन्त्यः सन्ति । किन्तु विषुववृत्तीयप्रदेशस्थानि वनानि अतीव सस्यैः युक्तानि सन्ति, यत्र लघुसस्यानि सूर्यप्रकाशं प्राप्तुम् अपि न शक्नुवन्ति तत्र आर्द्रमये वातावरणेऽपि वनस्पतयः स्वविकासं कुर्वन्ति । सर्वे प्राणिनः पर्यावरणेन सह आनुकूल्यं संस्थाप्य स्वकीयां प्रगतिं साधयन्ति एव । भोजनं रक्षणं च प्राप्तुं विविधान् मार्गान् अन्वेषयन्ति । वृष्टिनिर्मितेषु वनेषु सततं जायमानायाः वृष्टेः कारणात् सूर्यप्रकाशस्य अनुपस्थितौ च वनस्पतयः जलात् भोजनं पचन्ति । तथैव जीवति अस्माकं श्रीवल्ली (money plant) । अस्माकं गृहेषु स्थापितायां जलकूप्यामपि विना मृत्तिकां विकसति एषा श्रीवल्ली । सा केवलं जलमेव पिबति । जलात् एव आवश्यकानि क्षारादितत्त्वानि अश्नाति । अत एव सूर्यप्रकाशात् ऋतेऽपि एषा वृद्धिं याति । लोके एका मान्यता वर्तते यत् श्रीवल्लीं गृहे वपामः चेत् धनस्य वृद्धिः भवति । मान्यतायाः कारणं स्यात् यत् एतस्याः लतायाः पर्णानि रूप्यकमिव स्थूलानि वृत्ताकारयुक्तानि च भवन्ति । अतः ''मनी प्लान्ट'' इति उच्यते । एतस्याः अन्यानि नामानि अपि सन्ति तद्यथा – ''गोल्डनपोथोस'' ''हन्टर्स रोब'' ''आइवी एरम'' तथा च ''सिल्वरवाइन'' इति । सम्यक् पोषणं प्राप्नोति चेत् श्रीवल्ली २० मीटरपरिमिता दीर्घा तथा च तस्याः पर्णानि ०२ इञ्चपरिमितानि सम्भवन्ति । एषा सर्वदा हरितवर्णीयापि भवितुं शक्नोति ।

श्रीवल्ली – money plant, सस्यम् – plant, आर्द्र – humid, जलकूपी – water bottle, वपनम् (वपामः) – sowing

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **व्रीडा** | **लज्जा** | shyness |
| **केकावलः** | **मयूर** | peacock |
| **केलिः** | **क्रीडा** | play/ sport |
| **वितृष्णः** | **संतुष्ट** | contented |
| **विभावरी** | **रात्रि** | night |
| **विभावसुः** | **सूर्य** | sun |
| **ज्ञप्तिः** | **समझना** | understanding |
| **कार्म्मुकम्** | **धनुष्य** | bow |
| **सदागतिः** | **पवन** | air |
| **लाला** | **लार** | saliva |
| **प्रतिश्रुत्** | **प्रतिज्ञा /प्रतिध्वनि** | promise/ echo |
| **ध्वाङ्क्षः** | **कौआ** | crow |
| **पाथः** | **जल** | water |
| **उपवर्तनम्** | **देश** | country |
| **त्रियामा** | **रात्रि** | night |

## किं भवन्तः जानन्ति ?

**१ ) भारतीयग्रन्थानुसारं प्रमुखानि वनानि कति सन्ति ?**
(क) अष्ट (ख) सप्त (ग) दश (घ) नव

**२ ) भारतीयपरम्परायां कति अरण्यानि उल्लिखितानि वर्तन्ते ?**
(क) दश (ख) सप्त (ग) अष्ट (घ) नव

**३ ) कति महायज्ञाः मताः वर्तन्ते ?**
(क) २ (ख) ४ (ग) ५ (घ) ३

**४ ) कतिप्रकारकाणि वाद्यानि भवन्ति ?**
(क) अष्ट (ख) पञ्च (ग) सप्त (घ) षट्

**५ ) भारतीयज्योतिषशास्त्रानुगुणं कति राशयः वर्तन्ते ?**
(क) पञ्चदश (ख) अष्टादश (ग) द्वादश (घ) षोडश

**६ ) कं यज्ञं कृत्वा राजा 'सम्राट्' पदं प्राप्नोति स्म ?**
(क) पुत्रेष्टिः (ख) सौत्रामणिः (ग) राजसूयः (घ) अश्वमेधः

**७ ) आचार्यस्य चाणक्यस्य मूलनाम किम् आसीत् ?**
(क) विष्णुगुप्तः (ख) विष्णुशर्मा (ग) विष्णुदत्तः (घ) चणकः

उत्तराणि – (१) ख (२) घ (३) ग (४) ख (५) ग (६) ग (७) ख

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY

**Online**

## Admission Open

# संस्कृतभाषाशिक्षणम्

## Second Level

**Date :** 10/10/22 to 10/1/23
**Day :** Mon-Wed-Fri
**Time :** 7:30am to 9:00am
**Fees :** 5000/-

EKLAVYA SANSKRIT ACADEMY

**Online / Offline**

## Admission Open

# संस्कृतभाषाशिक्षणम्

## First Level

**Date :** 10/10/22 to 10/1/23
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 5000/-

# दीपावलीवर्गः

## Sanskrit Grammer (Cl 9 & 10)

**Date :** 1/11/22 to 8/11/22
**Day :** Daily
**Time :** 9:00 am to 10:30 am (IST)
**Fees :** 2500/-

**contact: Dr Mihir Upadhyay, 98246 16237**

## संस्कृत- साम्प्रतम्

नमस्कारः

यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

### ग्राहक शुल्कम्

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

## मुक्तकत्रयी

वेदे यस्य विलासिता विलसिता वन्द्यैर्वरैर्वर्णिता
सच्छात्रेषु च यस्य भव्यगरिमा विद्यावरैर्वन्दिता ।
व्यासाद्यैर्भवभूतिबाणकविभिः गानं कृतं भावतः
तस्यैतैः गुणगौरवैस्सुमुदिताः भद्राः वयं भा–रताः ॥

या वेदामृतदायिनी मधुमयी सत्या शिवा सुन्दरा
या गङ्गायमुनादिभिस्सुपुनिता संस्कारसंस्कारिता ।
सर्वार्थं ह्यवतारधारणतया यस्याः कृता धन्यता
माता भारतनामिका सुमुदिता सौख्यां करोतु कृपाम् ॥

प्रभो ! शुद्धाबुद्धिः परहितपरा स्यात्प्रतिपलम्
वराणां वन्द्यानां सुविमलमनसा समभवेच्छं–करत्वम् ।
सुकार्यैस्स्यान्नित्यं सुजनजनसेवा सुखमयी,
स्वतन्त्रे राष्ट्रे नः प्रभवतु सदा प्रीतिकरणम् ॥

**डॉ. वासुदेवः पाठकः 'वागर्थः'**

**प्रियवाचकाः**

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
।। जयतु संस्कृतं जयतु भारतम् ।।

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006